एलालवङ्गकर्पूरमरिचैरवधूलिता ॥
पानकस्यास्य गण्डूषं धारयित्वा मुखे मुहुः ।
अरुचिं नाशयत्येव पित्तं प्रशमयेत्तथा” ॥
अम्लिकापानं ॥ ३ ॥
“राजिका जीरको भृष्टो भृष्टं हिङ्गु सनागरं ।
सैन्धवं दधि गोः सर्व्वं वस्त्रपूतं प्रकल्पयेत् ॥
तावन्मात्रं क्षिपेत्तत्र यथा स्याद्रुचिरत्तमा ।
तक्रमेतद्भवेत् सद्यो रोचनं वह्निवर्द्धनं” ॥
तक्रं ॥ ४ ॥
“गव्यमावर्त्तितं दुग्धं निबद्धं दधि माहिषं ।
एकीकृत्य पटे घृष्टं शुभ्रशर्करया समं ।
एलालवङ्गकर्पूरमरिचैश्च समन्वितं ।
नाम्ना शिखरिणी कुर्य्यात् रुचिं सकलवल्लभा ॥
शिखरिणी ॥५॥
द्वे पले दाडिमादष्टौ खण्डाच्छोषपलत्रयं ।
त्रिसुगन्धिपलञ्चैकं चूर्णमेकत्र कारयेत् ।
तच्चूर्णं मात्रया भुक्तमरोचकहरं परं ।
दीपनं पाचनञ्च स्यात् पीनसज्वरकासजित्” ॥
दाडिमादिचूर्णं ॥ ६ ॥

“लवङ्गकक्कोलमुशीरचन्दनं
नतं सनीलोत्पलकृष्णजीरकं ।
जलं सकृष्णागुरुभृङ्गकेसरं
कणा सविश्वा नलदं सहैलया ॥
तुषारजातीफलवंशरोचना-
सिताभ्रभागाः सकलं विचूर्णितं ।
सुरोचनं तर्पणमग्निदीपनं
बलप्रदं वृष्यतमग्निदोषजित् ।
उरोविबन्धं तमकं गलग्रहं
सकासहिक्कारुचियक्ष्मपीनसं ।
ग्रहण्यतीसारमुरःक्षतं तृषां
तथा प्रमेहान्निखिलान्निहन्ति हि” ॥

कक्कोलं फलं सुगन्धविशेषः । नतं तगरं । जलं बालकं । भृङ्गं त्वक् । नलदमुशीरं ।तुषारः कर्पूरः। लवङ्गादिचूर्णं ॥ ७ ॥ इत्यरोचकाधिकारः । इति भावप्रकाशः ॥
(“यवागूः पञ्चकोलस्य कुलत्थाढ्क्ययूषकं ।
मुद्गयूषेण वा सम्यक् भक्ष्याणां भोजनं हितं ।
सहिङ्ग्युषणाद्यञ्च व्यञ्जनं संप्रशस्यते ।
अग्निघृतवत् श्रेष्ठं भोजनारोचकेष्वपि ।
कारवेल्लं पटोलञ्च पलाण्डुः सुरसा शठी ।
लवणं धान्यकं श्रेष्ठं प्रलेहश्च कटुत्रिकं ।
शठीसर्षपवास्तूकं शतपुष्पा यमानिका ।
तुम्बीरकस्य मूलानां शाकं श्रेष्ठं प्रशस्यते ।
गोधूमपुलिका श्रेष्ठा भृष्टाङ्गारैररोचके ।
जाङ्गलानि च मांसानि भोजयेद्भिषगुत्तमः” ।
इति हारीतोक्तपथ्यादिनियमः ॥ ० ॥
“अरुचौ कवलो ग्राह्यो धूमाः समुखधावनाः ।
मनोज्ञमन्नपानञ्च हर्षणाश्वासनानि च ॥
कुष्ठसौवर्च्चलाजाजी शर्करामरिचं विडं ।
धात्र्येलापद्मकोशीरपिप्पल्युत्पलचन्दनं ॥
लोध्रं तेजोवती पथ्या त्र्यूषणं सयवाग्रजं ।
आर्द्रा दाडिमनिर्य्यासाश्चाजाजी शर्करायुतः ।
सतैलमाक्षिकास्त्वेते चत्वारः कवलग्रहाः ।
चतुरोऽरोचकान् हन्युर्व्वाताद्येकजसर्व्वजान् ॥
कारवी मरिचाजाजी द्राक्षावृक्षाम्लदाडिमं ।
सौवर्च्चलं गुडं क्षौद्रं सर्व्वारोचकनाशनं ॥
वस्तिः समीरणे पित्ते विरेकं वमनं कफे ।
कुर्य्याद्धृद्यानुकूलानि हर्षणञ्च मनोघ्नजे” ॥
इति चरकोक्तास्य चिकित्सा । सनिदानलक्षणां चिकित्सामाह ॥ * ॥ सुश्रुतः ।

“दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,
भक्तायनेषु हृदि चावतते प्रगाढं ।
नान्नेऽरुचिर्भवति तं भिषजो विकारं,
भक्तोपघातमिह पञ्चविधं वदन्ति ॥
हृच्छूलपीडनयुतं विरसाननत्वं,
वातात्मके भवति लिङ्गमरोचके तु ।
हृद्दाहचोषबहुता मुखतिक्तता च,
मूर्च्छा सतृड् भवति पित्तकृते तथैव ॥
कण्डूगुरुत्वकफसंस्रवसादतन्द्राः,
श्लेष्मात्मके मधुरमास्यमरोचके तु ।
सर्व्वात्मके पवनपित्तकफा बहूनि,
रूपाण्यथास्य हृदये समुदीरयन्ति ॥
संरागशोकभयविप्लुतचेतसस्तु,
चिन्ताकृतो भवति सोऽशुचिदर्शनाच्च” ॥*॥

चिकित्सा यथा,—

“वाते वचाम्बु वमनं कृतवान् पिबेच्च,
स्नेहैः सुराभिरथवोष्णजलेन चूर्णं ।
कृष्णाविडङ्गयवभस्महरेणुभार्ग्गी,
रास्नैलहिङ्गुलवणोत्तमनागराणां ॥
पित्ते गुडाम्बुमधुरैर्वमनं प्रशस्तं,
स्नेहः ससैन्धवसितामधुसर्पिरिष्टः ।
निम्बाम्बुवामितवतः कफजेऽनुपानं,
राजद्रुमाम्बुमधुना तु सदीप्यकं स्यात् ॥
चूर्णं यदुक्तमथवानिलजे तदेव,
सर्व्वैश्च सर्व्वकृतमेवमुपक्रमेत ॥
लाक्षापटोलविडवेत्रकरीरनिम्ब-
मूर्व्वाभयाक्षवदरामलकेन्द्रवृक्षैः ।
वीजैः करञ्जनृपवृक्षभवैश्च पिष्टै-
र्लेहं पचेत् सुरभिमूत्रयुतं यथावत् ॥
मुस्तां वचां त्रिकटुकं रजनीद्वयञ्च,
भार्गीञ्च कुष्ठमथ निर्दहनीञ्च पिष्ट्वा ।
मूत्रेऽविजे द्विरदमूत्रयुते पचेद्वा,
पाठान्तगामतिविषां रजनीञ्च मुख्यां ॥
मण्डूकिमर्कमसृताञ्च सलाङ्गलाख्यां,
मूत्रे पचेत्तु महिषस्य विधानविद्वा ।
एतांश्च सन्ति चतुरो लिहतस्तु लेहान्,
गुल्मारुचिश्वसनकण्ठहृदामयाश्च ॥
सात्म्यान् स्वदेशरचितान् विविधांश्च भक्ष्यान्,
पानानि मूलफलषाडवरागयोगान् ।
अद्यादसांश्च विविधान् विविधैः प्रकारै-
र्भुञ्जीत वापि लघुरूक्षमनःसुखानि ॥
आस्थापनं विधिवदत्र विरेचनञ्च,
कुर्य्यान्मृदूनि शिरसश्च विरेचनानि ।
क्षीणूषणानि रजनीत्रिफलायुतानि,
चूर्णीकृतानि यवशूकविमिश्रितानि ॥
क्षुद्रायुतानि वितरेन्मुखधावनार्थ-
मन्यानि तिक्तकटुकानि च भेषजानि ।
मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः,
क्वाथैर्जयेन्मधुयुतैर्विविधैश्च लेहैः ॥
मूत्रासवैर्गुडकृतैश्च तथात्वरिष्टैः,
क्षारासवैश्च मधुमाधवतुल्यगन्धैः ।
स्यादेषएव कफवातहते विधिश्च,
शान्तिं गते कृतभुजि प्रशमाय तस्य ॥
हृच्छाभिघातभयशोकहतेऽन्तरग्नौ,
भावान् भवाय वितरेत् खलु शक्यरूपान् ।
अर्थेषु चाप्युपचितेषु पुनर्भवाय,
पौराणिकैः श्रुतिपथैरनुमानयेत्तं ॥
दैन्यं गते मनसि बोधनमत्र शस्तं,
यद्यत् प्रियं तदुपसेव्यमरोचके तु ॥*॥
रसगन्धौ समौ शुद्धौ दन्तीक्वाथेन भावयेत् ।
जम्बीरस्य रसैर्वापि आर्द्रकस्य रसेन वा ॥
मातुलुङ्गस्य तोयेन तस्य मज्जरसैर्बुधः ।
पश्चाद्विशोष्य सर्व्वांस्तान् टङ्कणञ्चावचारयेत् ॥
देवपुष्पं बाणमितं रसपादं मृतामृतं ।
मासमात्रञ्च तत् सर्व्वं नागरेण गुडेन वा ॥
सर्व्वारोचकशूलार्त्तिमामवातं सुदारुणं ।
सोऽयं निवारयत्याशु केशरी करिणं यथा” ॥
सुधानिधिरसः ॥ ० ॥ इति वैद्यकरसेन्द्रसारसंग्रहः ॥)

अर्क, क, तापे । (चुरादि उभयपदी सेट् ।) स्तुतौ । इति कविकल्पद्रुमः ॥ एककारः प्रकृतिः पश्चाद्रेफनिमित्तकद्वित्वं विभाषया वक्तव्यं । तेन क अर्कयति अर्क्कयति एवं सर्व्वत्र । इति दुर्गादासः ॥

अर्कः, पुं, (अर्च + कर्म्मणि घञ्, कुत्वम् ।) सूर्य्यः । इन्द्रः । ताम्रं । स्फटिकः । इति मेदिनी ॥ पण्डितः । इति शब्दरत्नावली ॥ ज्येष्ठभ्राता । इति दण्डादिनाथः ॥ लक्षणया रविवारः । इति ज्योतिषं ॥ वृक्षविशेषः । आकन्द इति भाषा । तत्पर्य्यायः । क्षीरदलः २ पुच्छी ३ प्रतापः ४ क्षीरकाण्डकः ५ विक्षीरः ६ क्षीरी ७ खर्ज्जुघ्नः ८ शीतपुष्पकः ९ जम्भनः १० क्षीरपर्णी ११ विकीरणः १२ सदापुष्पः १३ सूर्य्याह्वः १४ आस्फोतकः १५ तूलफलः १६ शुकफलः १७ । इति राजनिर्घण्टः ॥ वसुकः १८ आस्फोतः १९ गणरूपः २० मन्दारः २१ अर्कपर्णः २२ । इत्यमरः ॥ * ॥ अथ श्वेतार्कपर्य्यायः । अलर्कः १ राजार्कः २ प्रतापसः ३ गणरूपी ४ ॥ * ॥ अथ रक्तार्कपर्य्यायः । विश्वोरः १ सदापुष्पी २ रूपिका ३ आदित्यपुष्पिका ४ दिव्यपुष्पिका ५ अर्कः ६ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वं । उष्णत्वं । अग्निकारित्वं । वातशोथव्रणार्शःकुष्ठक्रिमिनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफदोषनाशित्वं । तीक्ष्णत्वञ्च । अस्य क्षीरगुणाः । क्रिमिदोषव्रणनाशित्वं । कुष्ठार्श-उदररोगेषु हितकारित्वञ्च । इति राजवल्लभः ॥ तस्य पर्य्यायगुणाः ।
“श्वेतार्को गणरूपः स्यान्मन्दारो वसुकोऽपि च ।